श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सेवा श्री श्रीनिवासराघवार्य महादेशिक विरचितम्

# ॥ अक्षयाराधनम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ अक्षयाराधनम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

प्रभवो हि वेङ्कटेशो
    यस्य प्रभवो विजानते तत्त्वम्।
प्रभवं तमेव सेवे
    विरक्त साम्राज्य धूर्वहं नाथम्॥ १ ॥

विभवान् विधाय सूरीन्
    विभवो वेदान्तदेशिकः प्राज्ञः।
विभवं दधाति लोके यस्मिन्
    अवतीर्य वत्सरे स्वामी॥ २ ॥

शुक्लतामधिगतस्सुमेधसा
    मानसेन वपुषा सुकर्मणा।
शुक्लपक्ष विधुवद्विराजते
    शुक्लपक्षखगसन्निभः प्रभुः॥ ३ ॥

प्रमोदप्रदस्सुप्रमो दूतकृत्यं
    यद्नामधीशः कपी राजहंसः।
व्यतानीत् परं वेदचूडागुरुर्नः
    परो दूत आस्ते पराप्त्यै प्रजानाम्॥ ४ ॥

प्रजोत्पत्तिकर्मप्रदिष्टो विधाता
    प्रपञ्चं यथेच्छं विधाय प्रहृष्टः।
प्रजातो हि नूनं गुरुर्वेङ्कटेशः
    प्रबन्धान् प्रकृष्टान् सृजत्यद्भुतं नः॥ ५ ॥

www.prapatti.com

अङ्गीरसो यस्य कलाप्रपञ्चे
आङ्गीरसोऽसौ निगमान्तसूरिः।
आङ्गीरसाद्याः सदृशाः कथं वा
श्रीवेङ्कटेशस्य गुरोर्विहारे॥ ६ ॥

श्रीमुखस्सततमागमचूडा
सूरिरित्यतिशयो न जगत्याम्।
श्रीमुखादधिगतं बिरुदं तत्
येन वाजिवदनो वचसीन्धे॥ ७ ॥

भवे भवे भावुकसार्वभौमे
हृदि स्थिते वेङ्कटनाथसूरौ।
भवो हि नूनं विभवेन पूर्णः
पराभवो नैव भवेत् कदापि॥ ८ ॥

यूनाह्यनेकाद्भुतसूक्तिजालैः
नित्यं समाराधि युवा रमेशः।
विहारशीलोऽपि विरक्तिभूमा
श्रीवेङ्कटेशो गुरुरस्मदीयः॥ ९ ॥

धातुः प्रकृष्टो हि वचःप्रपञ्चे
धाता प्रकृष्टो हि विसर्गकृत्ये।
धातूपमो वेङ्कटनाथवेद्यः
तनोतु शं सङ्कटमोचनान्मे॥ १० ॥

ईश्वरो निखिलतन्त्रधूर्वहः
कोनु देशिकसमो महीतले।
संहृताविव विपक्षसंहृतौ
ईश्वरो नहि समज्ञतां परः॥ ११ ॥

बहुधान्य समृद्धोऽयं
बहुधान्यविमर्दनात्।

बहुधान्यरमाकान्तो
गुरुर्न्यासकृषीवलः॥ १२॥

प्रमाथी रिपूणां निजानां परेषां
प्रमाथीव विष्णुस्सुधाहाररक्तः।
प्रमादप्रमाथी श्रुतावागमे च
प्रमोदी च वेदान्तसूरिर्जगत्याम्॥ १३॥

परेषां मतानां प्रभेद प्रणाद
प्रसिद्धो हि लोके गुरुर्वेङ्कटेशः।
यदीयक्रमो विक्रमो वादिलोके
वयं सिंहविक्रान्तसूरिं भजामः॥ १४॥

विषूची प्रदग्धा विषादि प्रणष्टाः
विषादेन दग्धा मृषावाददृप्ताः।
वृषाद्रीश घण्टावतारं गुरुं मे
यदा नाश्रयन्ते तदा संप्रणष्टाः॥ १५॥

भामुखैर्जगति जीवनहारी
चित्रभानुरिति सूरमवोचन्।
सूक्तिभाभिरिह जीवनदाता
दिव्यसूरिरिह वेङ्कटेश्वरः॥ १६॥

स्वभानुभिस्स्वभावतो विभाति तेजसां पतिः
स्वभावसारसूक्तिभिर्विपश्चितां पतिर्महान्।
स्वतः प्रकाशमश्नुवन् स एव देशिकोत्तमो
मदीयमानसे तमस्ततिं व्यपोह्य राजताम्॥ १७॥

प्रतारकप्रतारणस्समस्ततारणो गुरुः
विभातिकारण प्रदर्शनेन निर्णयं वदन्।
निवारयन् निजोक्तिभिः परोक्तदूषणान्यहो
निरूपयन् विशिष्टतां नमामि देशिकोत्तमम्॥ १८॥

पार्थिवस्तुतिविधायिना तथा
पार्थिवं च वचसानुगृह्णता।
पार्थिवाश्रयसुखं निगृह्णता
वेदमौलिगुरुणा धृता वयम्॥ १९ ॥

अव्ययो हि भगवान् रमाधवः
सव्यसाचिहितकृन्निरन्तरम्।
दिव्यवाग्भिरभिरक्षतीह नः
तादृशो निगममौलिदेशिकः॥ २० ॥

सर्वजित् जगति कोऽपि न दृष्टः
वेद मौलिगुरुमन्तरा प्रभुम्।
सर्वजित् भवति कोऽपि मनुष्यः
तस्य पादयुग सेवनोत्सुकः॥ २१ ॥

कुधारी वराहः कुजारिर्विधारी
सुकूर्मो हनूमान् स गोपोऽद्रिधारी।
परं शङ्खचक्रादिधारी हतारिः
सतां वेदचूडागुरुस्सर्वधारी॥ २२ ॥

विरोधिपरिहारकृत् विजयते हि भूमण्डले
विरोधपरिहारतः सकलदिव्यसूक्तिष्वसौ।
विभाति विबुधोत्तमो विषमतादिदूरस्थितः
विशालगुणशेवधिः मनसि वेदचूडागुरुः॥ २३ ॥

विविधविकृतिभाजां पण्डितानां समाजे
विविधविकृतिजुष्टे प्राकृते चैव लोके।
प्रकृतिपुरुषभेदाज्ञानमोहे समिद्धे
प्रकृतिमुपगतो मे सात्विकीं देशिकेन्द्रः॥ २४ ॥

खरास्साधु वासांसि धृत्वा हि धन्याः
खरा ये वहन्तीह वादान्निरर्थान्।



www.prapatti.com

हता दुर्विदग्धाः परीहास दग्धाः
वयं शेखरान् प्राप्य धन्याः श्रुतीनाम्॥ २५॥

अनन्तनदनो भवान् अनन्तसूक्तिनन्दनः
सनन्दनादिसम्मतोह्यनन्दनन्दनः स्वयम्।
अमन्दमन्दनन्दनः सुजातनन्दनन्दनो
विभाति वेङ्कटाभिधाननन्दनो गुरुस्सताम्॥ २६॥

विजयराघवसंस्तुतिमद्भुतां
विरचयन् परमार्थभरां शुभाम्।
विजयते विबुधेषु दिवाकरो
विपुलवेद शिखामणिदेशिकः॥ २७॥

जयजयेति वदन् रघुनन्दनं
हनुमता समतां प्रतिपेदिवान्।
दिनकरं विहगं च सुदर्शनं
भजतिवेदशिखागुरुमाश्रये॥ २८॥

तिरस्करोति मन्मथं पुरस्करोति मन्मथं
पुरानिराकरोति वा रिपुं च तस्य सांप्रतम्।
विभाति मन्मथस्सतां निजैर्गुणैर्विमर्दनात्
नमामि मन्मथं त्रयीशिरोगुरुं तमन्वहम्॥ २९॥

दुर्मुखो भवति दुर्मुखाङ्गणे
संमुखो भवति संमुखाङ्गणे।
मन्मुखं कथमुपैति सङ्कटं
संमुखे भवति देशिकोत्तमे॥ ३०॥

विलंबीति मन्दं विजानाम्यहं हे
विलंबिन् त्यजेमं विलम्बेन मुक्तः।
विलम्बः कृतश्चेत् विना वेदचूडा-
गुरुं लम्बमानं विशेषेण कोऽव्यात्॥ ३१॥

विलम्बितफलप्रदे विफलकर्मणां सञ्चये
विहाय मतिमुत्तमां विविधदोष वैदेशिकम्।
भजामि बुधमण्डली परिबृढं परं सत्कलं
दयाशतकारिणं परमनिस्स्पृहं देशिकम्॥ ३२॥

विकारिजनसन्निधौ कथमकारि दानादिकं
प्रकारमभिमन्वते कमपिकालकोलाहलात्।
विकाररहिते मुदा परमपूरुषे निर्वृताः
भजन्तु मम देशिकं सुलभमार्ग संवेदकम्॥ ३३॥

शार्वरीतिमपहाय महान्तः
शर्वरीमिव दिनानि नयन्तः।
सर्वथाभ्युदयसूक्तिलिप्सया
देशिकं हि शरणं प्रयान्ति मे॥ ३४॥

प्लवो नास्ति लोके विना देशिकेन्द्रं
परं पारमाप्तुं दृढं सज्जनानाम्।
प्लवस्व प्लवस्वेति वाचं वदन्तः
परे राजमानाः कुदृष्टिप्रदुष्टाः॥ ३५॥

शुभाशुभविवेककृत् शुभनिबन्धन ग्रन्थकृत्
विभाति शुभकृत् प्रभुः निगममौलिसूरिस्सदा।
यदीयचरणाश्रया जगति शोभनासज्जनाः
जयन्ति गुणमेदुरा निगमसौधसञ्चारिणः॥ ३६॥

शोभाकरश्शोभकृदेव जातः
शोभाकरे वैदिकसत्पथस्य।
आशान्तशोभं मम शान्तिशोभं
विना गुरुं वेदशिखाप्रदीपम्॥ ३७॥

क्रोधी यदि स्यान्मनुजो जगत्यां
न शान्तिमेतीति सुनिश्चितं नः।

www.prapatti.com

न क्रोध आसीत्परपक्षभङ्गे
    हेतुर्मदीये निगमान्तसूरौ॥ ३८ ॥

विश्वावसुर्विश्वगुणावलोकी
    विश्वस्यतां विन्दति वैदिकानाम्।
विश्वासनायावतरन् हि वेद-
    चूडा गुरुर्विश्वनिधिः समिन्धे॥ ३९ ॥

पुरातनीनां कृतकेतराणां
    पश्चात्तनीनां च मुनीरितानाम्।
पराभवो नैव बभूव वाचां
    जाते त्रयीशेखरसूरिवर्ये॥ ४० ॥

निदर्शनं भक्तिमतां प्लवङ्गो
    गुरूत्तमेनाभिदधे गुरुत्वे।
वियुक्तयोगं व्यतनोत् स्वकृत्या
    तथाविधो वेदशिरोगुरुर्मे॥ ४१ ॥

वेदकण्टकनिभानिभानहो
    वेदकीलकगणेन मर्दितुम्।
वेदमौलि गुरुभव्यकेसरी
    वेददूरजनभञ्जनो बभौ॥ ४२ ॥

सौम्यः को वा श्रीसखाद्विसखाद्वा
    विष्णोर्दासात् सुक्रियादक्रियाद्वा।
जातो ज्ञातो देशिकादन्यजीवः
    सौम्या यूयं ब्रूत वेदान्तसूरेः॥ ४३ ॥

साधारणः पण्डितमण्डनोऽयं
    वेदान्तसूरिः कृतिभिर्विशिष्टः।
इत्यूचिवान् पण्डितपामरोऽयं
    वेत्तुं रहस्यं कथमर्हतीह॥ ४४ ॥

विरोधिवर्गकृन्तनात् विरोधिकृद्विभाव्यते
　　विराधिनञ्च शन्तमैर्वचोभिरेव पात्यहो।
विरोधिनः पदाग्रहा मुधाग्रहं विहाय ते
　　पदग्रहेण धन्यतां प्रपेदिरे त्रयीगुरोः॥ ४५॥

परीतापिनां कर्मजालप्रबन्धैः
　　परीतापहत्यै यतेताद्य को वा।
परं वेदचूडागुरुस्सर्वशान्त्यै
　　लघुं मुक्तिमार्गं प्रदाय प्रहृष्टः॥ ४६॥

प्रमादी च लोके हितं नैव पृच्छेत्
　　स्वकीयां हि सत्तां विहायावसादी।
प्रमादो न धत्ते पदं वैष्णवानां
　　प्रजागर्ति वेदान्तसूरिर्महीयान्॥ ४७॥

आनन्द निलयानन्द सन्दोहो वेङ्कटेश्वरः।
दर्शनानन्दसंफुल्लनयनो गुरुरागतः॥ ४८॥

राक्षसो भवति मानवोऽपि सन्
　　रक्षणाय जगतां निगमानाम्।
जाग्रतीह निगमान्तगुरौ मे
　　भक्तिमेव कलयेन्न हि मोहात्॥ ४९॥

नलः पाकशास्त्रेऽनलः पाककृत्ये
　　बली वादयुद्धेऽबलस्साधुकृत्ये।
कलाः पुष्कला वा कलौ लब्धसत्ताः
　　गिरावादिसिंहे गुरौ वादिसिंहे॥ ५०॥

पिङ्गळादिनय मङ्गळाशयाः
　　साधवो जगति जाग्रति स्वयम्।
मङ्गळप्रदकृतिः कृतो गुरुः
　　जृंभते श्रुतिशिरोविभूषणम्॥ ५१॥

www.prapatti.com

कालयुक्ति कलनेन जनानां
मोहनाय बहुधा निरतानाम्।
वादजातमपनीय सदर्थान्
रक्षति श्रुतिशिखागुरुरेकः॥ ५२॥

सिद्धार्था बहवो लसन्ति भुवने भोगादिभिर्भूरिभिः
सिद्धार्थं शरणं प्रपद्य विमुखा वेदेषु च प्रायशः।
तेऽसिद्धा इति तत्वनिर्णयधुरासाम्राज्यनिर्वाहकः
सिद्धार्थी परमो विभाति निगमान्तार्यो गुरुस्सर्वदा॥ ५३॥

रौद्री रीतिर्नैव दृष्टा जगत्यां
भावे सौम्ये वैष्णवे सर्वथापि।
वादे मीमे वावदूके गुरौ मे
वेदान्तार्ये सात्विकानां अधीशे॥ ५४॥

दुर्मतिर्जयति पण्डितमानी
दुर्गतश्च विनयात् सुमतिः स्यात्।
यद्यसौ निगमशेखरसूरेः
कञ्चिदप्यधिकरोति निबन्धम्॥ ५५॥

वाद्यते विजयदुन्दुभिस्सदा
भासुरैर्महितभूसुरैर्मुदा।
यद्ध्वनेरपगतं तमस्सतां
वेदमौलिगुरुराड् विजृंभते॥ ५६॥

रुधिरोद्गारिता दृष्टा
सर्वथा विजयैषिणाम्।
वेदान्तार्यगुरौ दृष्टे
वादिगोष्ठीविभूषणे॥ ५७॥

यादवोऽपि सुरक्ताक्षः
तथा रामानुजो गुरुः।

तद्व्यासक्तरक्ताक्षी
देशिको मां निरीक्षताम्॥ ५८ ॥

क्रोधनैः किमपि नैव बाध्यते
शोधनेन वचसां विनिर्णये।
साधुवेदशिखरार्यलेखने
दर्शनीयपदवीं उपाश्रिते॥ ५९ ॥

अक्षयो हि भगवानुपाश्रितो-
ह्यक्षयं फलमवाप्य निर्वृताः।
वैष्णवा जगति येन सूरिणा
तं नुमो निगममौलिदेशिकम्॥ ६० ॥

अक्षयप्रभव वत्सरादिमैः
शब्दराशिभिरनन्तभोगदैः।
संस्तुवन् मुदमुपैति देशिकं
श्रीनिधी रघुवरोऽत्रिवंशजः॥ ६१ ॥

अक्षयाक्षरसमर्पणादहं
भावभूतिपदभाजनं कृती।
बोभवीमि निगमान्त सूरिसत्
पादधूलि पद भाजनं सुखी॥ ६२ ॥

॥ इति अक्षयाराधनं संपूर्णम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com